क्रेदशनैश्चर्वयत्यतिभैरवं॥११॥
एकंजग्राहकेशेषुग्रीवायामथचा

राम
८६

परं॥ पादेनाक्रम्य चैवान्यमुरसान्य
मपोथयत्॥ १२॥ तैर्मुक्तानि च श
स्त्राणि महास्त्राणि तथासुरैः॥ मुखे
न जग्राह रुषा दशनैर्मथितान्यपि १३
बलिनां तद्बलं सर्वमसुराणां दुरात्म
नां॥ ममर्दाभक्षयच्चान्यानन्यांश्चा
ताडयत्तथा॥ १४॥ असिना निहताः

स. म्रा.
८७

केचित्केचित्खट्वांगताडिताः॥जग्मु
र्विनाशमसुरादंताग्राभिहतास्तथा
१५॥क्षणेनतद्बलंसर्वमस्कराणांनि
पातितं॥दृष्ट्वाचंडोभिदुद्रावतांका
लीमतिभीषणां॥१६॥शरवर्षैर्महा
भीमैर्भीमाक्षींतांमहासुरः॥छादयामास
चक्रैश्चमुंडक्षिप्तैः सहस्रशः

राम
८७

१७॥ तानि चक्राण्यनेकानि विशा
मानानि तन्मुखं॥ बभुर्यथार्कबिंबा
नि सुबहूनि घनोदरं॥१८॥ ततो ज
हासातिरुषा भीमं भैरवनादिनी॥
कालीकरालवक्त्रांतर्दुर्दर्शदशनो
ज्ज्वला॥१९॥ उत्थाय च महासिंहं दे
वी चंडमधावत॥ गृहीत्वा चास्य के

स॰ श॰
८८

श्रेषु शिरस्तेनासिनाछिनत्॥२०॥
अथ मुंडोभ्यधावत्तांदृष्ट्वाचंडंनि
पातितं॥ तमप्यपातयद्भूमौसाखड्
ङ्गाभिहतंरुषा॥२१॥हतश्रेषंततःसै
न्यंदृष्ट्वाचंडंनिपातितं॥मुंडंचसुम
हावीर्यंदिशोभेजेभयातुरं॥२२॥
शिरश्चंडस्यकालीचगृहीत्वामुंड

राम
८८

मेवच॥ प्राह प्रचंडाट्टहाससमिश्रम-
भ्येत्य चंडिकां॥ २३॥ मयातवात्रोप
हृतौ चंडमुंडौ महापशू॥ युद्धयज्ञे स्व
यं शुंभं निशुंभं च हनिष्यसि॥ २४॥
ऋषिरुवाच॥ २५॥ तावानीतौ ततो
दृष्ट्वा चंडमुंडौ महासुरौ॥ उवाच का-
लीं कल्याणी ललितं चंडिका वचः

स॰ श॰
८२

२६॥ यस्माच्चंडं च मुंडं च गृहीत्वा त्वमु
पागता॥ चामुंडेति ततो लोके ख्याता
देवि भविष्यसि॥२७॥ इति मार्कंडे।
य पुराणे सावर्णिके मन्वंतरे देवीमा।
हात्म्ये चंडमुंडवधः॥ ७॥ ऋषिरुवा
च॥१॥ चंडे च निहते दैत्ये मुंडे च वि
निपातिते॥ बहुलेषु च सैन्येषु क्षयि

राम
८२

तेष्वसुरेश्वरः ॥ २ ॥ ततः कोपपराधी
नचेताः शुंभः प्रतापवान् ॥ उद्योगंस
र्वसैन्यानां दैत्यानामादिदेशह ॥
३ ॥ अद्यसर्वबलैर्दैत्याः षडशीतिरु
दायुधाः ॥ कंबूनांचतुराशीतिर्निर्यां
तुस्वबलैर्वृताः ॥ ४ ॥ कोटिवीर्याणिपं
चाशदसुराणांकुलानिवै ॥ शतंकु

स॰श॰
९०

स्त्रानिधौम्राणांनिर्गच्छंतुममाज्ञया
५॥कालकादौर्हृदामौर्याःकालके।
यास्तथासुराः॥युद्धायसज्जानिर्या
तुआज्ञयात्वरितामम॥६॥इत्याज्ञा
प्यासुरपतिःशुंभोभैरवशासनः॥
निर्जगाममहासैन्यसहस्रैर्बहु
भिर्वृतः॥७॥आयांतंचंडिकादृष्ट्वा

राम
९०

ततःसैन्यमतिभीषणं॥ज्यास्वनैःपूर
यामासधरणीगगनांतरं॥८॥ततःसिं
होमहानादमतीवकृतवान्नृप॥घंटा
स्वनेनतांनादानंबिकाचोपबृंहय
त्॥९॥धनुर्ज्यासिंहघंटानांनादापू
रितदिङ्मुखाः॥निनादैर्भीषणैःका
लीजिग्येविस्तारितानना॥१०॥त

स॰श॰
२१

न्निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दि
शं॥ देवीसिंहस्तथा काली सरोषैः परि
वारिता॥६१॥ एतस्मिन्नंतरे भूपवि
नाशाय सुरद्विषां॥ भवायामरसिंहा
नामतिवीर्यबलान्विताः॥६२॥ ब्रह्मे
शगुहविष्णूनां तथेंद्रस्य च शक्तयः
शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चंडिकां

राम
२१

यथुः॥१३॥यस्यदेवस्ययद्रूपंयथाभू
षणवाहनं॥तद्वदेवहितच्छक्तिरसु
रान्योद्धुमाययौ॥१४॥हंसयुक्तविमा
नाग्रेसाक्षसूत्रकमंडलुः॥आयाता
ब्रह्मणःशक्तिर्ब्रह्माणीसाभिधीय
ते॥१५॥माहेश्वरीवृषारूढात्रिशू
लवरधारिणी॥महाहिवलयामा

स॰श॰
२२

त्ताचंद्ररेखाविभूषणा ॥१६॥ कौमा
रीशक्तिहस्ताचमयूरवरवाहना ॥ यो
द्धुमभ्याययौदैत्यानंबिकागुहरूपि
णी ॥१७॥ तथैववैष्णवीशक्तिर्ग
रुडोपरिसंस्थित्ता ॥ शंखचक्रगदा
शार्ङ्गखड्गहस्ताभ्युपाययौ ॥१८॥
यज्ञवाराहमतुलंरूपंयाबिभ्रतो।

राम
२२

हरेः॥ शक्तिः साप्यायययोत्तत्र वाराः
हीं बिभ्रतीतनुं॥१९॥ नारसिंहीन्नसिं
हस्य बिभ्रती सदृशं वपुः॥ प्राप्तात्त
त्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः॥
२०॥ वज्रहस्तातथैवैंद्रीगजराजो
परिस्थिता॥ प्राप्तासहस्रनयनाय
थाशक्रस्तथैवसा॥२१॥ ततः परि

स॰श॰
२३

वृतस्ताभिरीशानोदेवशक्तिभिः
हन्यंतामसुराःशीघ्रंममप्रीत्या
हचंडिकां॥२२॥ततोदेवीशरीरा
त्तुविनिष्क्रांतातिभीषणा॥चंडि
काशक्तिरत्युग्राशिवाशतनिना
दिनी॥२३॥साचाहधूम्रजटिल
मीशानमपराजिता॥दूतत्वंगच्छ

राम
२३

भगवन्पार्श्वं शुंभनिशुंभयोः॥
२४॥ ब्रूहि शुंभं निशुंभं च दानवा
वतिगर्वितौ॥ ये चान्ये दानवास्त
त्र युद्धाय समुपस्थिताः॥ २५॥ त्रै
लोक्यमिंद्रो लभतां देवाः संतु हवि
र्भुजः॥ यूयं प्रयात पातालं यदि
जीवितुमिच्छथ॥ २६॥ बलावले

पादस्थचेद्ध्रुवंतेनांयुद्धकांक्षिणः॥तदाग
च्छतत्त्वंतुमच्छिवाःपिशितेनवः॥
२७॥यत्तोनियुक्तोदैत्येननतयादेव्या
शिवःस्वयं॥शिवदूतीतिलोकेस्मिं
स्ततःसाख्यातिमागता॥२८॥तेपि
श्रुत्वावचोदेव्याःशर्वाख्यातंमहा
सुराः॥अमर्षापूरिताजग्मुर्यत्रका

त्यायनीस्थिता॥२९॥ततः प्रथम(
मेवाग्रे शरशस्त्रर्ष्टिवृष्टिभिः॥वव
र्षुरुद्धतामर्षास्तां देवीममरारयः॥
३०॥संचलान्प्रहितान्बाणान्छूलश
क्तिपरश्वधान्॥चिच्छेद लीलया(
ध्मातधनुर्मुक्तैर्महेषुभिः॥३१॥न(
स्यागतस्तथा कालीभूलपातविस

स॰श॰ रितान्॥ खट्वांगपोथितांश्चारीन्कुर्वं
२५ तीव्यचरत्तदा॥ ३२॥ कमंडलुजला
क्षेपहतवीर्यान्हतौजसः॥ ब्रह्माणी
चाकरोच्छत्रून्येनयेनस्मधावति
३३॥ माहेश्वरीत्रिशूलेनतथाचक्रे
णवैष्णवी॥ दैत्यान्जघानकौमारी राम
तथाशक्त्यातिकोपना॥ ३४॥ ऐंद्री २५

कुलिशापातेन शातशो दैत्यदानवाः
पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रव
र्षिणः ॥ ३५ ॥ तुंडप्रहारविध्वस्तादं
ष्ट्राग्रक्षतवक्षसः ॥ वराहमूर्त्यान्यप
तंश्चक्रेण च विदारिताः ॥ ३६ ॥ नखैर्वि
विदारितांश्चान्यान्भक्षयंती महासु
रान् ॥ नारसिंही चचाराजौ नादापू ।

स॰श॰
२६

र्णदिगंबरा ॥३७॥ चंडाट्टहासैरसुराः
शिवदूत्यभिदूषिताः ॥ पेतुःपृथिव्यां
पतितांतांश्चखादाथसातदा ॥३८
इतिमातृगणंक्रुद्धंमर्दयंतंमहासु
रान् ॥ दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवा
रिसैनिकाः ॥३९॥ पलायनपरान्दृ
ष्ट्वादैत्यान्मातृगणार्दितान् ॥ योद्धु

राम
२६

मभ्यायययौ क्रुद्धो रक्तबीजो महासु

रः॥४०॥रक्तबिंदुर्यदा भूमौपतत्यस्य

स्यशरीरतः॥समुत्पतति मेदिन्यांत

त्प्रमाणोमहास्फुरः॥४१॥युयुधेस

गदापाणिरिंद्रशक्त्यामहासुरः॥४

ततश्चैंद्रीस्ववज्रेणरक्तबीजमता

डयत्॥४२॥कुलिशेनाहतस्याशु

बहुशस्त्रावशोणितं॥ समुत्तस्थुस्त
तोयोधास्तद्रूपास्तत्पराक्रमाः॥४३
यावंतः पतितास्तस्य शरीराद्रक्तबिं
दवः॥ तावंतः पुरुषाजातास्तद्वीर्यब
लविक्रमाः॥४४॥ तेचापियुयुधुस्त
त्रपुरुषारक्तसंभवाः॥ समंमात्तभि
रत्युग्रंशस्त्रपातातिभीषणं॥४५॥

पुनश्च वज्रपातेन क्षतमस्य शिरो
यदा॥ ववाह रक्तं पुरुषास्ततो जाताः
सहस्रशः॥४६॥ वैष्णवी समरे चैनं
चक्रेणाभिजघानह॥ गदया ताड
यामास ऐंद्री तमसुरेश्वरं॥४७॥ वै
ष्णवी चक्रभिन्नस्य रुधिरस्रावसं
भवैः॥ सहस्रशो जगद्व्याप्तं तत्प्रमा

स॰ श॰
२८

णैर्महासुरैः ॥४८॥ शक्त्या जघानकौ
मारी वाराहीच तथासिना॥ माहेश्व
री त्रिशूलेन रक्तबीजं महासुरं॥४९॥
सचापिगदयादैत्यः सर्वएवाहनत्स
थक्॥ मातॄः कोपसमाविष्टो रक्तबी
जो महासुरः॥५०॥ तस्याहतस्य बहु
धाशक्तिशूलादिभिर्भुवि॥ पपाततयो

राम
२८

वैरक्तौघस्तेनासन्छतशोसुराः॥५१
तैश्चासुरासृक्संभूतैरसुरैः सकलंज
गत्॥ व्याप्तमासीत्ततोदेवा भयमा
जग्मुरुत्तमं॥५२॥ तांन्विषण्णांत्सु
रान्दृष्ट्वा चंडिका प्राहसत्वरा॥ उवाच
कालीं चामुंडे विस्तीर्णं वदनं कुरु॥५३
मच्छस्त्रपातसंभूतान्रक्तबिंदून्म

स॰श॰
२२

हासुरान्॥ रक्तबिंदोः प्रतीछ त्वं वक्रे
णानेनवेगिना ॥५४॥ भक्षयंतीचर
रणेतदुत्पन्नान्महासुरान्॥ एवमेष
क्षयंदैत्यः क्षीणरक्तोभविष्यति॥५५
भक्ष्यमाणास्त्वयाचोग्रानचोत्पत्स्यं
तिचापरे॥ इत्युक्त्वातांततोदेवीभू
लेनाभिजघानतं॥५६॥ मुखेनका

राम
२२

लीजगृहे रक्तबीजस्य शोणितं ॥ ५७
ततोसावाजघानाथगदयातत्र चं
डिकां ॥ नचास्यावेदनांचक्रे गदा
पातोल्पिकामपि ॥ ५८ ॥ तस्याहत
स्यदेहात्तुबहुसुस्राव शोणितं ॥ य
तस्ततस्तद्वक्रेण चामुंडासंप्रती
च्छति ॥ ५९ ॥ मुखेसमुद्गतायेस्यार

स॰ श॰
१००

क्तपातान्महासुराः॥तांश्चखादाथ
चामुंडापपौतस्यचशोणितं॥६०॥
देवीशूलेनवज्रेणबाणैरसिभिऋ
ष्टिभिः॥जघानरक्तबीजंतंचामुंडा
पीतशोणितं॥६१॥सपपातमही
पृष्ठेशस्त्रसंघसमाहतः॥नीरक्त
श्चमहीपालरक्तबीजोमहासुरः

राम
१००

द्दृशात्तनस्तेहर्षमतुलमवापुस्त्रिद
शान्नृप॥ तेषांमातृगणोजातोनन
र्त्तासृङ्मदोद्धतः॥८३॥ इतिमार्कंडे
यपुराणेसाव० रक्तबीजवधः॥ ८॥
राजोवाच॥ १॥ विचित्रमिदमाख्या
तंभगवन्भवताममा॥देव्याश्चरि
तमाहात्म्यंरक्तबीजवधाश्रितं॥२

भूयश्चेच्छाम्यहंश्रोतुंरक्तबीजेनिपा
तिते॥चकारशुंभोयत्कर्मनिशुंभश्चा
तिकोपनः॥३॥ऋषिरुवाच॥४॥च
कारकोपमतुलंरक्तबीजेनिपाति
ते॥शुंभासुरोनिशुंभश्चहतेष्वन्येषु
चाहवे॥५॥हन्यमानंमहासैन्यंविलो
क्यामर्षमुद्वहन्॥अभ्यधावन्निशुंभो

भोथमुख्ययासुरसेनया॥६॥तस्या
ग्ननस्ततथापृष्ठपार्श्वयोश्चमहासु
राः॥संदष्टोष्ठपुटाःक्रुद्धाहंतुंदेवीमु
पाययुः॥७॥आजगाममहावीर्यः
शुंभोपिस्वबलैर्वृत्तः॥निहंतुंचंडि
कांकोपात्कृत्वायुद्धंतुमात्तभिः॥
८॥ततोयुद्धमतीवासीद्देव्याशुंभ

निशुंभयोः॥शरवर्षमतीवोग्रंमेघ
योरिववर्षतोः॥९॥चिच्छेदास्तान्छरा
स्ताभ्यांचंडिकास्वशरोत्करैः॥ताडया
मासचांगेषुशस्त्रौघैरसुरेश्वरौ॥१०
निशुंभोनिशितंखड्गंचर्मचादाय
सुप्रभं॥अताडयन्मूर्ध्निसिंहंदेव्या
वाहनमुत्तमं॥११॥ताडितेवाहने

देवीक्षुरप्रेणासिमुत्तमं॥ निश्शुंभ।
स्याशुचिच्छेद चर्मचाप्यष्टचंद्रकं।
१२॥ छिन्ने चर्मणि खड्गे च शक्तिं चि।
क्षेप सोसुरः॥ तामप्यस्य द्विधा च।
क्रे चक्रेणाभिमुखागतां॥ १३॥ को
पाध्मातो निश्शुंभोथ शूलं जग्राह।
दानवः॥ आयांतं मुष्टिपातेन देवी।

तच्चाप्यचूर्णयत् ॥ १४ ॥ आविध्या
थ गदां सोपि चिक्षेप चंडिकां प्रति ॥
सापि देव्या त्रिशूलेन भिन्ना भस्मत्व
मागता ॥ १५ ॥ ततः परशुहस्तं तमा
यांतं दैत्यपुंगवं ॥ आहत्य देवी बाणौ
घैरपातयत भूतले ॥ १६ ॥ तस्मिन्नि
पतिते भूमौ निशुंभे भीमविक्रमे ॥

भ्रान्तर्यनीवसंक्रुद्धः प्रययौहंतुमं।
बिकां॥१७॥सरथस्थस्तथात्युच्चै।
र्गृहीतपरमायुधैः।भुजैरष्टाभिरतु
लैर्व्याप्याशेषंबभौनभः॥१८॥तमा
यांतंसमालोक्यदेवीशंखमवादय
त्।ज्याशब्दंचापिधनुषश्चकारा।
तीवदुःसहं॥१९॥पूरयामासककुभो

स॰श॰
१०४

निजघंटास्वनेनच॥ समस्तदैत्यसै
न्यानांतेजोवधविधायिना॥२०॥त
तःसिंहोमहानादैस्त्याजितेभमहाम
दैः॥ पूरयामासगगनंगांतथैवदिशो
दश॥२१॥ततःकालीसमुत्पत्यगग
नंक्ष्मामताडयत्॥ कराभ्यांतंनिना
देनप्राक्स्वनास्तेतिरोहिताः॥२२॥

राम
१०४

अट्टाट्टहासमशिवंशिवदूतीचका
रह॥तैःशब्दैरसुरास्त्रेसुःशुंभःको
पंपरंययो॥२३॥दुरात्मंस्तिष्ठतिष्ठे
तिव्याजहारांबिकायदा॥तदाज
येत्यभिहितंदेवैराकाशसंस्थितैः
२४॥शुंभेनागत्ययाशक्तिर्मुक्ता
ज्वालातिभीषणा॥आयांतीवन्हि

स॰श॰
१०५

कूटाभासा निरस्ता महोल्कया॥२५
सिंहनादेन शुंभस्य व्याप्तं लोकत्र।
यांतरं॥ निर्घातनिःस्वनो घोरो जि
तवानवनीपत्ते॥२६॥ शुंभमुक्ता।
न्छरान्देवी शुंभस्तत्प्रहितान्छरान्
चिच्छेद स्वशरैरुग्रैः शतशोथ स
हस्रशः॥२७॥ ततः सा चंडिकाक्रु

राम
१०५

द्धाभ्रूलेनाभिजघानत्तं॥सत्तदाभि
हत्तोभूमोमूर्छितोनिपपात्तह॥२८॥
त्ततोनिशुंभः संप्राप्यचेतनामात्त॥
कार्मुकः॥आजघानशरैर्देवींका।
लींकेसरिणंतथा॥२९॥पुनश्चक्रु
त्वाबाहूनामयुत्तंदनुजेश्वरः॥च।
क्रायुत्तेनदितिजश्छादयामासचं

स॰ श॰
१०६

डिकां ॥३०॥ ततो भगवती क्रुद्धा दुर्गा
दुर्गार्त्तिनाशिनी ॥ चिच्छेद देवी चक्रा
णि स्वशरैः सायकांश्च तान् ॥३१॥
ततो निशुंभो वेगेन गदामादाय चं
डिकां ॥ अभ्यधावत वै हंतुं दैत्यसैन्य
समावृतः ॥३२॥ तस्यापतत एवाशु
गदां चिच्छेद चंडिका ॥ खड्गेन शित

एम
१०६

धारेण स च भूलं समाददे ॥ ३३ ॥ भू
लहस्तं समायांतं निशुंभममरार्दनं
हृदि विव्याध भूलेन वेगाविद्धेन चं
डिका ॥ ३४ ॥ भिन्नस्य तस्य भूलेन हृ
दयान्निःसृतोपरः ॥ महाबलो महा
वीर्यस्तिष्ठेति पुरुषो वदन् ॥ ३५ ॥ त
स्य निष्क्रामतो देवी प्रहस्य स्वनवत्त

स॰ श॰
१०७

नः॥ शिरश्छिन्नेदखड्गेन ततोसाव
पतद्भुवि॥ ३६॥ ततः सिंहश्चखादोग्र
दंष्ट्राक्षुण्णशिरोधरान्॥ असुरां
स्तांस्तथाकालीशिवदूतीतथापरा
न्॥ ३७॥ कौमारीशक्तिनिर्भिन्नाःके
चिन्नेशुर्महासुराः॥ ब्रह्माणीमंत्रपूते
नतोयेनान्येनिराकृताः॥ ३८॥ माहे

राम
१०७

श्वरीत्रिशूलेनभिन्नाःपेतुस्तथाप
रे॥वाराहीतुंडघातेनकेचिच्चूर्णीक्
ताभुवि॥८१॥खंडंखंडंचचक्रेणवै
ष्णव्यादानवाःकृताः॥वज्रेणचैंद्री
हस्ताग्रविमुक्तेनतथापरे॥८२॥के
चिद्विनेशुरसुराःकेचिन्नष्टामहा
हवात्॥भक्षिताश्चापरेकालीशि

वदूतीमृगाधिपे॥४१॥इतिमार्कंडे
यपुराणेसावर्णिकेमन्वंतरेदे॰ निशुं
भवधः॥२॥ऋषिरुवाच॥१॥नि
शुंभंनिहतंदृष्ट्वाभ्रातरंप्राणसंमितं
हन्यमानंबलंचैवशुंभः क्रुद्धोब्रवी
द्वचः॥२॥बलावलेपदुष्टेत्वंमादुर्गेव
र्गमावह॥अन्यासांबलमाश्रित्ययु

ध्यसेवातिमानिनी॥३॥देव्युवाच॥
४॥ एकैवाहंजगत्यत्रद्वितीयाकाम
मापरा॥पश्यैत्तादुष्टमय्येवविशंत्यो
मद्विभूतयः॥५॥ततः समस्तास्तादे
व्योब्रह्माणीप्रमुखालयं॥तस्यादे
व्यास्तनौजग्मुरेकैवासीत्तदांबिका
६॥देव्युवाच॥७॥अहंविभूत्याब

स॰श॰
१०९

हुभिरिहरूपैर्यदास्थिता॥ तत्संहृतं
मयैकैव तिष्ठाम्याजौ स्थिरो भव॥८
॥ऋषिरुवाच॥ ९॥ ततः प्रववृते
युद्धं देव्याः शुंभस्य चोभयोः॥ पश्य
तां सर्वदेवानामसुराणां च दारु
णं॥१०॥ शरवर्षैः शितैः शस्त्रैस्त
था चास्त्रैः सुदारुणैः॥ तयोर्युद्ध

राम
१०९

मभूद्भूयः सर्वलोकभयंकरं ॥११
दिव्यान्यस्त्राणिचात्रशो मुमुचे।
यान्यथांबिका॥बभंजतानिदैत्यें
द्रस्तत्प्रतीघातकर्त्तृभिः॥१२॥मु
क्तानितेनचास्त्राणिदिव्यानिप
रमेश्वरी॥बभंजलीलयैवोग्रहुं।
कारोच्चारणादिभिः॥१३॥ततः त्रा

स॰श॰
११०

रस्त्रैर्देवीमाच्छादयत सोऽसुरः॥
सापि तत्कुपितादेवी धनूंषि चिच्छेद
चेषुभिः॥१४॥छिन्ने धनुषि दैत्यें
द्रस्तथाशक्तिमथाददे॥ चिच्छेद दे
वीचक्रेण तामप्यस्य करे स्थितां॥
१५॥ततः खड्गमुपादाय शतचंद्रं
च भानुमत्॥अभ्यधावत्तदा देवीं

राम
११०

दैत्यानामधिपेश्वरः॥१६॥तस्याप
तत एवाशुखड्गंचिच्छेद चंडिका॥
धनुर्मुक्तैः शितैर्बाणैश्चर्मचार्कक
रामलं॥१७॥अश्वांश्चपातयामा
सरथंसारथिनासह॥हताश्वःसत
दादैत्यश्छिन्नधन्वाविसारथिः॥
१८॥जग्राहमुद्गरंघोरमंबिकानि

स॰श॰
१११

धनोद्यतः॥ चिच्छेदापततस्तस्य
मुद्गरं निशितैः शरैः॥१९॥ तथापि
सोभ्यधावत्तां मुष्टिमुद्यम्य वेगवा
न्॥ स मुष्टिं पातयामास हृदये दैत्यपुं
गवः॥२०॥ देव्यास्तं चापि सा देवी तल
नोरस्यताडयत्॥ तलप्रहाराभिहतो

निपपात महीतले॥२१॥ स दैत्यराजः

सहसापुनरेवतथोत्थितः॥उत्पत्यच
प्रगृह्योच्चैर्देवींगगनमास्थितः॥२२॥
तत्रापिसानिराधारायुयुधेतेनचंडि
का॥२३॥नियुद्धंखेतदादैत्यश्चंडिका
चपरस्परं॥चक्रतुःप्रथमंसिद्धमुनि
विस्मयकारकं॥२४॥ततोनियुद्धंसु
चिरंकृत्वातेनांबिकासह॥उत्पात्य

स॰श॰
११२

भ्रामयामासचिक्षेपधरणीतले॥२५
सक्षिप्तोधरणींप्राप्यमुष्टिमुद्यम्यवे
गितः॥अभ्यधावतदुष्टात्माचंडिका।
निधनेछया॥२६॥तमायांतंततोदे
वीसर्वदैत्यजनेश्वरं॥जगत्यांपात।
यामासभित्वाशूलेनवक्षसि॥२७॥
सगतासुःपपातोर्व्यांदेवीशूलाग्रवि

राम
११२

क्षन:॥चालयन्सकलांपृथ्वीं साब्धि
द्वीपांसपर्वतां॥२८॥ततःप्रसन्नम
खिलंहतेतस्मिन्दुरात्मनि॥जगत्स्वा
स्थ्यमतीवापनिर्मलंचाभवन्नभः॥
२९॥उत्पातमेघाःसोल्कायेप्रागा
संस्तेशममंययुः॥सरितोमार्गवाहि
न्यस्तथासंस्तत्रपातिते॥३०॥ततो

स॰ग्रा॰
११३

देवगणाः सर्वे हर्षनिर्भरमानसाः॥ बभू
वुर्निहते तस्मिन् गंधर्वा ललितं जगुः
३१॥ अवादयंस्तथैवान्ये ननृतुश्चा
प्सरोगणाः॥ ववुः पुण्यास्तथा वाताः
सुप्रभोभूद्दिवाकरः॥३२॥ इति मार्कं
डेयपुराणे सावर्णिके मन्वंतरे देवीमा
हात्म्ये शुंभवधः॥१०॥ ऋषिरुवाच

राम
११३

१॥ ऋ देव्याहतेतत्रमहासुरेंद्रेसेंद्राः
सुरावन्हिपुरोगमास्तां॥ कात्यायनीं
तुष्टुवुरिष्टलाभाद्विकासिवक्त्राब्ज
विकासिताशाः॥१॥ देविप्रपन्नार्ति
हरेप्रसीदप्रसीदमातर्जगतोखिल
स्य॥ प्रसीदविश्वेश्वरिपाहिविश्वं।
त्वमीश्वरीदेविचराचरस्य॥२॥ आ

स॰श॰
११४

धारभूताजगतस्त्वमेकामहीस्वरू
पेणयतःस्थितासि॥ अपांस्वरूपस्थि
तयात्वयैतदाप्याय्यतेकृत्स्नमलं
घ्यवीर्ये॥४॥ त्वंवैष्णवीशक्तिरनंत
वीर्याविश्वस्यबीजंपरमासिमाया
संमोहितंदेविसमस्तमेतत्त्वंवै[illegible] राम
प्रसन्नाभुविमुक्तिहेतुः॥५॥ विद्याः ११४

समस्तास्तवदेविभेदाः स्त्रियः सम
स्ताः सकलाजगत्सु॥त्वयैकयापूरि
तमंबयैतत्कातेस्तुतिः स्तव्यपराप
रोक्तिः॥६॥सर्वभूतायदादेवीस्वर्ग
मुक्तिप्रदायिनी॥त्वंस्तुतास्तुतयेका
वाभवंतुपरमोक्तयः॥७॥सर्वस्यबु
द्धिरूपेणजनस्यहृदिसंस्थिते॥स्वर्गा

स॰श॰
११५

पवर्गदेदेविनारायणिनमोस्तुते॥८॥
कलाकाष्ठादिरूपेणपरिणामप्रदायि
नि॥विश्वस्योपरतौशक्तेनारायणिन
मोस्तुते॥९॥सर्वमंगलमंगल्येशिवेस
र्वार्थसाधिके॥शरण्येत्र्यंबकेगौरिना
रायणिनमोस्तुते॥१०॥सृष्टिस्थिति
विनाशानांशक्तिभूतेसनातनि॥गु

णाश्रयेगुणमयेनाराº॥११॥शरणा
गतदीनार्त्तपरित्राणपरायणे॥सर्व
स्यार्त्तिहरेदेविनाराº॥१२॥हंसयुक्त
विमानस्थे ब्रह्माणीरूपधारिणि॥कौ
शांभः क्षरिकेदेविनाराº॥१३॥त्रिशू
लचंद्राहिधरे महावृषभवाहिनि॥मा
हेश्वरीस्वरूपेणनारायणिº॥१४॥म

स॰त्रा॰
११६

पूरकुकुरवृत्तेमहाशान्तिधरेनघो॥कौ
मारीरूपसंस्थानेनारायणि॰॥१५॥शं
खचक्रगदाशार्ङ्गगृहीतपरमायुधे
प्रसीदवैष्णवीरूपेनारा॰॥१६॥गृही
तोग्रमहाचक्रेदंष्ट्रोधृतवसुंधरे॥व
राहरूपिणिशिवेनारा॰॥१७॥नृसिं
हरूपेणोग्रेणहंतुंदैत्यान्कृतोद्यमे॥

राम
११६

त्रैलोक्यत्राणसहिते नारा०॥१८॥ कि
रीटिनि महावज्रे सहस्रनयोज्ज्वले॥ मी
वृत्रप्राणहरे चैंद्रि नारा०॥१९॥ शिव
दूतीस्वरूपेण हतदैत्यमहाबले॥ घोर
रूपे महारावे नारा०॥२०॥ दंष्ट्राकरा
लवदने शिरोमालाविभूषणे॥ चामुं
डे मुंडमथने नारा०॥२१॥ लक्ष्मिलज्जे
महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे॥ महारात्रि महावि

स·श्रा·
११७

महाविद्येनारा०॥२२॥मेधेसरस्वतिव
रे भूतिबाभ्रवितामसि॥ नियतेत्वंप्र
सीदेश्रोनारा०॥२३॥सर्वस्वरूपेसर्वे(
श्रोसर्वशक्तिसमन्विते॥भयेभ्यस्त्रा
हिनोदेविदुर्गेदेविनमोस्तुते॥२४॥
एतत्तेवदनंसौम्यंलोचनत्रयभूषि
तं॥पातुनःसर्वभीतिभ्यःकात्याय

राम
११७

निनमोस्तुते॥२५॥ज्वालाकरालम
त्युग्रमशेषासुरसूदनं॥ त्रिशूलंपा
तुनोभीतेर्भद्रकालिनमोस्तुते॥२६
हिनस्तिदैत्यतेजांसिस्वनेनापूर्य
याजगत्॥साघंटापातुनोदेविपा
पेभ्योनःसुतानिव॥२७॥असु
रासृग्वसापंकचर्चितस्तेकरोज्व

स॰श॰
११८

लः॥ शूभायखड्गो भवतु चंडिके त्वां नत्तावयं ॥ २८ ॥ रोगानशेषानपहंसि तुष्टा रुष्टा तु कामान्सकलानभीष्टान्। त्वामाश्रितानांनविपन्नराणां त्वामाश्रिताह्याश्रयतांप्रयांत्ति ॥ २९ ॥ एतत्कृतंयत्कदनं त्वयाद्यधर्मद्विषांदेवि महासुराणां ॥ रूपैरने

राम
११८

केर्बहुधात्ममूर्तिंकृत्वांबिकेत्तत्म
करोत्तिकान्या॥३०॥विद्यासुशा।
स्त्रेषुविवेकदीपेष्वाद्येषुवाक्येषुच
कात्वदन्या॥ममत्वगर्तेत्तिमहांध।
कारेबिभ्रामयस्येत्तदत्तीवविश्वं
३१॥रक्षांसियत्रोग्नविषाश्चना।
गायत्रारयोदस्युबलानियत्र॥द

स-न्रा-
११९

वानलोयत्रत्तथाब्धिमध्येतत्रस्थि
तात्वंपरिपासिविश्वं॥३२॥विश्वेश्व
रीत्वंपरिपासिविश्वंविश्वात्मिकाधा
रयसीतिविश्वं॥ विश्वेशवंद्याभव
तीभवंतिविश्वाश्रयायेत्वयिभक्ति
नम्राः॥३३॥देविप्रसीदपरिपालर
यनोरिभीतेर्नित्यंयथासुरवधाद

राम
११९

धुनैवसद्यः॥ पापानिसर्वजगतांप्र
शमंनयाशुउत्पातपाकजनितां
श्चमहोपसर्गान्॥ ३४॥ प्रणतानां
प्रसीदत्वंदेविविश्वार्तिहारिणि॥ त्रै
लोक्यवासिनामीड्येलोकानांवर
दाभव॥ ३५॥ देव्युवाच॥ ३६॥ वर
दाहंसुरगणावरंयन्मनसेच्छथ॥

स॰श॰ नंवृणुध्वंप्रयच्छामिजगतामुपका
१२० रकं॥३७॥देवाऊचुः॥३८॥सर्वबा
धाप्रशमनंत्रैलोक्यस्याखिलेश्वरि
एवमेवत्वयाकार्यमस्मद्वैरिविनाश
नं॥३९॥देव्युवाच॥४०॥वैवस्वतेंत
रेप्राप्तेअष्टाविंशतिमेयुगे॥शुंभोनि
शुंभश्चैवान्यावुत्पत्स्येतेमहासुरौ॥ राम
१२०

४१॥ नंदगोपगृहे जाता यशोदागर्भसंभवा॥ ततस्तौ नाशयिष्यामि विंध्याचलनिवासिनी॥ ४२॥ पुनरप्यतिरौद्रेण रूपेण पृथिवीतले॥ अवतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान्॥ ४३॥ भक्षयंत्याश्च तानुग्रान्वैप्रचित्तान्महासुरान्॥ रक्तादंता भवि

स॰रा॰
१२१

ष्यंतिदाडिमीकुसुमोपमाः॥४४॥नतो
मांदेवताः स्वर्गेमर्त्यलोकेचमानवाः
स्तुवंतोव्याहरिष्यंतिसततंरक्तदंति
कां॥४५॥भूयश्चशतवार्षिक्यामम
नावृष्ट्यामनंभसि॥मुनिभिः संस्तु
ताभूमौसंभविष्याम्ययोनिजा॥
४६॥ततः शतेननेत्राणांनिरीक्षि

राम
१२१

ष्यामि यन्मुनीन्॥ कीर्तयिष्यंति मनु
जाः शाताक्षीमिति मां ततः॥४७॥त
तोहमखिलं लोकमात्मदेहसमुद्भवैः
भरिष्यामि सुराः शाकैरावृष्टेः प्राण
धारकैः॥४८॥ शाकंभरीति विख्या
तिं तदा यास्याम्यहं भुवि॥४९॥तत्रै
व च वधिष्यामि दुर्गमाख्यं महासुरं

स॰श॰ दुर्गादेवीतिविख्यातिंतन्मेनामभवि
१२२ ष्यति॥५०॥पुनश्चाहंयदाभीमंरूपं(
कृत्वाहिमाचलेरक्षांसिभक्षयिष्या
मिमुनीनांत्राणकारणान्॥५१॥तदा
मांमुनयःसर्वेस्तोष्यंत्यानम्रमूर्त्तयः
भीमादेवीतिविख्यातिंतन्मेनामभवि राम
ष्यति॥५२॥यदारुणाख्यस्त्रैलोक्ये १२२

महाबाधां करिष्यति॥ तदाहं भ्रामरं रू
पं कृत्वा संख्येयषट्पदं॥ ५३॥ त्रैलो
क्यस्य हितार्थाय वधिष्यामि महासु
रं। भ्रामरीति च मां लोकास्तदा स्तो
ष्यंति सर्वतः॥ ५४॥ इत्थं यदा यदा बा
धा दानवोत्था भविष्यति॥ तदा तदाव
तीर्याहं करिष्याम्यरिसंक्षयं॥ ५५॥

स॰श॰ इतिमार्कंडेयपुराणेसावर्णिकेमन्वंत
१२३ रेदेवीमाहात्म्येनारायणीस्तुतिः॥११
देव्युवाच॥१॥एभिस्तवैश्चमांनित्यं
स्तोष्यतेयःसमाहितः॥तस्याहंसक
लांबाधांशमयिष्याम्यसंशयं॥२॥
मधुकैटभनाशंचमहिषासुरघातनं राम
कीर्तयिष्यंतियेतद्वद्वधंशुंभनिशुंभ १२३

यो॥३॥ अष्टम्यां च चतुर्दश्यां नवम्यां
चैकचेतसः॥ श्रोष्यंति चैव ये भक्त्या
मम माहात्म्यमुत्तमं॥४॥ न तेषां दुष्कृ
तं किंचिद्दुष्कृतोत्था न चापदः॥ भवि
ष्यति न दारिद्र्यं न चैवेष्टवियोजनं॥
५॥ शत्रुतो न भयं तस्य दस्युतो वा न
राजतः॥ न शस्त्रानलतो योघात्क

स॰ श॰ दाचित्संभविष्यति॥६॥तस्मान्ममैत

१२४ न्माहात्म्यंपठितव्यंसमाहितैः॥श्रोत

व्यंचसदाभक्त्यापरंस्वस्त्ययनंमहत्

७॥उपसर्गानशेषांस्तुमहामारीसमु

द्भवान्॥तथात्रिविधमुत्पातंमाहा

त्म्यंशमयेन्मम॥८॥यत्रैतत्पठ्यते

सम्यङ्नित्यमायतनेमम॥सदाननद्वि

मोक्ष्यामि सान्निध्यं तत्र मे स्थितं ॥ ९
बलिप्रदाने पूजायामग्निकार्ये महो
त्सवे ॥ सर्वममैतच्चरितमुच्चार्यं श्रा
व्यमेव च ॥ १० ॥ जानताऽजानता वा
पि बलिपूजां तथा कृतां ॥ प्रतीक्षि
ष्याम्यहं प्रीत्या वन्हिहोमं तथा कृतं
११ ॥ शरत्काले महापूजा क्रियते या

स·त्रा·
१२५

चवार्षिकी॥ तस्यां ममैतन्माहात्म्यं
श्रुत्वाभक्तिसमन्वितः॥१२॥सर्वाबा
धाविनिर्मुक्तोधनधान्यसमन्वितः
मनुष्योमत्प्रसादेनभविष्यतिनसं
शयः॥१३॥श्रुत्वाममैतन्माहात्म्यंत
थाचोत्पत्तयःशुभाः॥पराक्रमंचयु
द्धेषुजायतेनिर्भयःपुमान्॥१४॥रि

राम
१२५

पवः संक्षयं यांति कल्याणं चोपपद्य
ते ॥ नंदते च कुलं पुंसां माहात्म्यं मम
शृण्वतां ॥ १५ ॥ शांतिकर्मणि सर्वत्र
तथा दुःस्वप्नदर्शने ॥ ग्रहपीडासु चो
ग्रासु माहात्म्यं शृणुयान्मम ॥ १६ ॥ उ
पसर्गाः शमं यांति ग्रहपीडाश्च दारु
णाः ॥ दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमु

स.श.
१२६

पजायते॥१७॥बालग्रहाभिभूतानां
बालानांशांतिकारकं॥संघातभेदे
चनृणांमैत्रीकरणमुत्तमं॥१८॥दुर्वृ
त्तानामशेषाणांबलहानिकरंपरं॥
रक्षोभूतपिशाचानांपठनादेवना
शनं॥१९॥सर्वममैतन्माहात्म्यंममसं
निधिकारकं॥२०॥पशुपुष्पार्घधूपै

राम
१२६

श्च गंधदीपैस्तथोत्तमैः॥ विप्राणां भो
जनैर्होमैः प्रोक्षणीयैरहर्निशं॥२१॥
अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्स
रेणया॥ प्रीतिर्मे क्रियते सास्मिन्स
कृदुच्चरिते श्रुते॥२२॥ श्रुतं हरति पा
पानि तथारोग्यं प्रयच्छति॥ रक्षां क
रोति भूतेभ्यो जन्मनां कीर्तनं मम॥२३

युद्धेषु चरितं यन्मे दुष्टदैत्यनिबर्हणं
तस्मिन्श्रुते वैरिकृतं भयं पुंसां न जाय
ते॥२४॥ युष्माभिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः॥ ब्रह्मणा च कृ
तास्तास्तु प्रयच्छंति शुभां मतिं॥२५॥
अरण्ये प्रांतरे वापि दावाग्निपरिवारि
तः॥ दस्युभिर्वावृतः शून्ये गृहीतो वा

पित्रा भ्रातृभिः ॥२६॥ सिंहव्याघ्रानुयातो
वा वने वा वनहस्तिभिः ॥ राज्ञा क्रुद्धेन
चाज्ञप्तो वध्यो बंधगतोपि वा ॥२७॥
आघूर्णितो वा वातेन स्थितः पोते म
हार्णवे ॥ पतत्सु चापि शस्त्रेषु संग्रामे
भृशदारुणे ॥२८॥ सर्वाबाधासु घो
रासु वेदनाभ्यर्दितोपि वा ॥ स्मरन्ममै

स॰ श॰
१२८

तच्चरितंनरोमुच्येतसंकटात्॥२९॥
ममप्रभावात्सिंहाद्यादस्यवोवैरिण
स्तथा॥दूरादेवपलायंतेस्मरतश्चरि
तंमम॥३०॥ऋषिरुवाच॥३१॥इ॥
त्युक्त्वासाभगवतीचंडिकाचंडविक्र
मा॥पश्यतामेवदेवानांतत्रैवांतर
धीयत॥३२॥तेपिदेवानिरातंकाः

राम
१२८

स्वाधिकारान्यथापुरा॥ यज्ञभागभु
जः सर्वेचक्रुर्विनिहतारयः॥३३
दैत्याश्चदेव्या॥ निहतेशुंभेदेवरिपोयु
धि॥ जगद्विध्वंसकेतस्मिन्महोग्रेतु
लविक्रमे॥३४॥ निशुंभेचमहावीर्ये
शेषाः पातालमाययुः॥३५॥ एवंभ
गवतीदेवीसानित्यापिपुनःपुनः॥

स॰श॰
१२२

संभूयकुरुतेभूपजगतःपरिपाल
नं॥३६॥तयैतन्मोह्यतेविश्वंसैववि
श्वंप्रसूयते॥सायाचिताचविज्ञानं
तुष्टाऋद्धिंप्रयच्छति॥३७॥व्याप्तंत
यैतत्सकलंब्रह्मांडंमनुजेश्वर॥महा
काल्यामहाकालेमहामारीस्वरूपया॥३८॥सैवकालेमहामारीसैवसृ

राम
१२२

ष्टिर्भवत्यजा ॥ स्थितिं करोति भूता
नां सैव काले सनातनी ॥ ३९ ॥ भव
काले नृणां सैव लक्ष्मीर्वृद्धिप्रदा गृ
हे ॥ सैवाभावे तथाऽलक्ष्मीर्विनाशा
योपजायते ॥ ४० ॥ स्तुता संपूजिता
पुष्पैर्गंधधूपादिभिस्तथा ॥ ददाति
वित्तं पुत्रांश्च मतिं धर्मे तथा शुभां ॥

स॰श॰
१३०

४१॥इतिमार्कंडेयपुराणेसावर्णिके
मन्वंतरेदेवीमाहात्म्येभगवतीवाक्यं
॥१२॥ऋषिरुवाच॥१॥ एतत्तेकथि
तंभूपदेवीमाहात्म्यमुत्तमं॥२॥ए
वंप्रभावासादेवीययेदंधार्यतेजग
त्॥विद्यातथैवक्रियतेभगवद्विष्णु
माययया॥३॥तयात्वमेषवैश्यश्च

राम
१३०

थैवान्येविवेकिनः॥मोह्यंतेमोहित्ता
श्चैवमोहमेष्यंतिचापरे॥४॥तामुपै
हिमहाराजशरणंपरमेश्वरीं॥आरा
धितासैवनृणांभोगस्वर्गापवर्गदा॥
५॥मार्कंडेयउवाच॥६॥इतितस्य
वचःश्रुत्वासुरथःसनराधिपः॥प्र
णिपत्यमहाभागंतमृषिंसंशितव्रत

स॰ श॰
१३१

तं॥७॥ निर्विण्णोतिममत्वेनराज्या
पहरणेनच॥ जगामसद्यस्तपसेस
चवैश्यो महामुने॥८॥ संदर्शनार्थमं
बायानदीपुलिनमास्थितः॥ सचवै
श्यस्तपस्तेपेदेवीसूक्तंपरंजपन्
९॥ तौतस्मिन्पुलिनेदेव्याः कृत्वा
मूर्त्तिंमहीमयीं॥ अर्हणांचक्रतुस्त

राम
१३१

स्याः पुष्पधूपाग्नितर्पणैः ॥१०॥
निराहारौ यताहारौ तन्मनस्कौ समा
हितौ ॥ ददतुस्तौ बलिं चैव निजगा
त्रासृगुक्षितं ॥११॥ एवं समाराध्य
यतोस्त्रिभिर्वर्षैर्यतात्मनोः ॥ परि
तुष्टा जगद्धात्री प्रत्यक्षं प्राह चंडि
का ॥१२॥ देव्युवाच ॥१३॥ यस्मा

र्थ्यतेत्वयाभूपत्वयाचकुलनंदन॥
मत्तस्तत्समाप्यतांसर्वंपरितुष्टाद
दामिते॥१४॥मार्कंडेयउवाच॥१५
ततोवज्रेन्द्रघोराज्यमविभ्रंत्रयन्य
जन्मनि॥अत्रैवचनिजंराज्यंहत
रात्रुबलंबलात्॥१६॥सोपिवैत्रय
स्ततोज्ञानंवज्रेनिर्विण्णमानसः॥

ममैस्यहमितिप्राज्ञः संगविच्युति।
कारकं॥१७॥देव्युवाच॥१८॥स्वल्पै
रहोभिर्नृपतेस्वंराज्यंप्राप्स्यतेभवा
न्॥१९॥हत्वारिपूनस्खलितंतव
तत्रभविष्यति॥२०॥मृतश्चभूयः
संप्राप्यजन्मदेवाद्विवस्वतः॥२१
सावर्णिकोनाममनुर्भवान्भुवि।

स॰श॰ भविष्यति॥२२॥ वैडूर्यवर्यल्वयायश्च
१३२ वरोस्मत्तोभिवांछितः॥२३॥ तंप्रयच्छा
मिसंसिध्येत्तवज्ञानंभविष्यति॥२४
मार्कंडेयउवाच॥२५॥ इतिदत्वात
योर्देवीयथाभिलषितंवरं॥ बभूवांत
र्हितासद्यो भक्त्यातभ्यामभिष्टुता॥ राम
२६॥ एवंदेव्यावरंलब्ध्वासुरथःक्ष १३२

त्रियर्षभः ॥ सूर्याज्जन्मसमासाद्य सा
वर्णिर्भविता मनुः ॥२७॥ इति दत्वा त
योर्देवी यथाभिलषितं वरं ॥ बभूवांत
र्हिता सद्यो भक्त्या ताभ्यामभिष्टुता ॥
२८॥ एवं देव्या वरं लब्ध्वा सुरथः क्ष
त्रियर्षभः ॥ सूर्याज्जन्मसमासाद्य सा
वर्णिर्भविता मनुः ॥२९॥ इमो श्लोको

स॰श॰ पुनरुक्तौ॥सर्वेमंत्राः॥७००॥इतिमा
१३४ र्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवी
माहात्म्येसुरथवैश्ययोर्वरप्रदानं॥
॥१३॥ ॥श्रीरस्तु॥ ॥ ॥
अहंरुद्रेभिरित्यष्टर्चस्यसूक्तस्यआं
भृणीवागृषिकाआंभृणीवाग्देवता राम
त्रिष्टुप्छंदःद्वितीयाजगतीदेवीसू॰ १३४

त्कजपेविनियोगः॥ॐ अहंरुद्रे
भिर्वसुभिश्चराम्यहमादित्यैरुतवि
श्वदेवैः॥अहंमित्रावरुणोभाबिभ
र्म्यहमिंद्राग्नीअहमश्विनोभा॥अ
हंसोममाहनसंबिभर्म्यहंत्वष्टारमु
तपूषणंभगं॥अहंदधामिद्रविणंह
विष्मतेसुप्राव्ये१यजमानायसुन्व

दे॰सू॰ ते।।अहंराष्ट्रीसंगमनीवसूनांचिकि
१३५ तुषीप्रथमायज्ञियानां।।तांमादेवा
व्यदधुःपुरुत्राभूरिस्थात्रांभूर्यावेश
यंतीं।।मयासोअन्नमत्तियोविपश्य
तियःप्राणितियईंशृणोत्युक्तं।।अमंत
वोमांतउपक्षियंतिश्रुधिश्रुतश्रद्धिवं राम
तेवदामि।।अहमेवस्वयमिदंवदामि। १३५

जुष्टंदेवेभिरुतमानुषेभिः॥यंकामये
तंतमुग्रंकृणोमितंब्रह्माणंतमृषिंतं
सुमेधां॥१॥अहंरुद्रायधनुरातनोमि
ब्रह्मद्विषेशरवेहंतवाउ॥अहंजनाय
समदंकृणोम्यहंद्यावापृथिवीआवि
वेश॥अहंसुवेपितरमस्यमूर्धन्मम
योनिरप्स्वं१तःसमुद्रे॥ततोवितिष्ठे

दे॰ सू॰
१३६

भुवनानुविश्वा॥ तामूर्ध्योवर्ष्मणोपस्य
शामि॥ अहमेववातइवप्रवाम्यारभ
माणाभुवनानिविश्वा॥ परोदिवापर
एनापृथिव्यैतावतीमहिनासंबभू
व॥ २॥ इतिदेवीसूक्तंजपेत्॥ अथ।
वा ॐ देवाऊचुः॥ नमोदेव्यैम॰ भक्ति
विनम्रमूर्त्तिभिः॥ इतिदेवीसूक्तंजपेत् १३६
॥त्॥

राम

श्रीगणेशायनमः॥ राजोवाच॥ भगवन्नवतारामेचंडिकायास्त्वयोदिताः॥ एतेषांप्रकृतिंब्रह्मन्प्रधानंवक्तुमर्हसि॥१॥ आराध्यंयन्मयादेव्याः स्वरूपंयेनवैद्विजः॥ विधिनाब्रूहिसकलंयथावत्प्रणतस्यमे॥२॥ ऋषिरुवाच॥ इदंरह।

रह०
१३७

स्यं परममनाख्येयं प्रचक्षते ॥ भक्तो
सीति न मे किंचित्तवावाच्यं नराधिप
३ ॥ सर्वस्याद्या महालक्ष्मीस्त्रिगुणा
परमेश्वरी ॥ लक्ष्यालक्ष्यस्वरूपा
सा व्याप्य कृत्स्नं व्यवस्थिता ॥ ४ ॥
मातुलिंगं गदां खेटं पानपात्रं च बि
भ्रती ॥ नागं लिंगं च योनिं च बिभ्र

राम
१३७

नीलनृपमूर्ध्वनि॥५॥तप्तकांचनव
र्णाभातप्तकांचनभूषणा॥भ्रूल्ये
तदखिलंस्वेनपूरयामासतेजसा
॥भ्रूल्यंतदखिलंलोकंविलोक्य
परमेश्वरी॥बभाररूपसंपन्नारंत
मसाकेवलेनहि॥७॥साभिन्नांज
नसंकाशादंष्ट्रांचितवरानना॥वि

२ह०
१३८

शालुलोचनानारीबभूवतनुम
ध्यमा॥८॥खड्गपात्रशिरःखेटैर
लंकृतचतुर्भुजा॥कबंधहारंशि
रसाबिभ्राणाहिशिरःस्रजं॥९॥
तांप्रोवाचमहालक्ष्मीस्तामसींप्र
मदोत्तमां॥ददामितवनामानियानि
कर्माणितानिते॥१०॥महामाया

राम
१३८

महाकालीमहामारीक्षुध्यात्तृषा
निद्रात्तृष्माचैकवीराकालरात्रि
र्दुरत्यया॥११॥इमानित्तवनामा
निप्रतिपाद्यानिकर्मभिः॥एभिः
कर्माणितेज्ञात्वायोधीत्तेसोश्नु
तेसुखं॥१२॥तामित्युक्त्वामहाल
क्ष्मीःस्वरूपमपरंन्नृप॥सत्वाख्ये

रहं॰ नाति शुद्धेन गुणेनेंदुप्रभंदधौ॥१३॥
१३१ अक्षमालांकुशाधरावीणापुस्तकधा
रिणी॥साबभूववरानारीनामान्यस्यै
चसाददौ॥१४॥महाविद्यामहावाणी
भारतीवाक्सरस्वती॥आर्याब्राह्मीका
मधेनुर्वेदगर्भाचधीश्वरी॥१५॥अ राम
थोवाचमहालक्ष्मीर्महाकालींसरस्व १३१

त्ती॥ युवां जनयतां देव्यौ मिथुने स्वा
नुरूपतः॥ १६॥ इत्युक्त्वा सा महाल ॥
क्ष्मीः ससर्ज मिथुनं स्वयं॥ हिरण्यग
र्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥
१७॥ ब्रह्मन्विधे विरिंचेति धातरित्या
ह तन्नरं॥ श्रीः पद्मे कमले लक्ष्मीत्या
ह माता स्त्रियं च तां॥ १८॥ महाकाली

रह०

१५०

भारतीच मिथुने सृजतः स्मह॥ एत
योरपि रूपाणि नामानि च वदामि ते
१९॥ नीलकंठं रक्तबाहुं श्वेतांगं चंद्र
शेखरं॥ जनयामास पुरुषं महाका।
लीसितां स्त्रियं॥ २०॥ स रुद्रः शंक
रः स्थाणुः कपर्दी च त्रिलोचनः॥ त्र।
यी विद्या कामधेनुः सा स्त्री भाषाक्ष

एम

१५०

रास्वरा॥२१॥सरस्वतीस्त्रियंगौरींकृ
ष्णंचपुरुषंनृप॥जनयामासनामा
नितयोरपिवदामिते॥२२॥विष्णुः
कृष्णोहृषीकेशो वासुदेवोजनार्द
नः॥उमागौरीसतीचंडीसुंदरीसुभ
गा शिवा॥२३॥एवंयुवतयःसद्यः।
पुरुषत्वंप्रपेदिरे॥चक्षुष्मंतोनुप।

इयंत्तिनेत्तरेत्तद्धिदोजनाः॥२४॥ब्रह्मणे
प्रददौपत्नीमहालक्ष्मीर्नृपत्रयीं॥रु
द्रायगौरींवरदांवासुदेवायचश्रियं॥
२५॥स्वरयासहसंभूयविरिंचोंडम
जीजनत्॥बिभेदभगवान्रुद्रस्तद्गौ
र्यासहवीर्यवान्॥२६॥अंडमध्येप्रधा
नादिकार्यजातमभून्नृप॥महाभू

नात्मकं सर्वं जगत्स्थावरजंगमं ॥ २७ ॥
पुपोष पालयामास तत्लक्ष्म्या सह केश
शवः ॥ महालक्ष्मीरेव मजा राजन्सर्वे
श्वरेश्वरी ॥ २८ ॥ निराकारा च सा का
रा सैव नानाभिधानभृत् ॥ नामांतरै

यः निरूप्यैषा नाम्ना नान्येन केन चित् ॥ २९

इति मार्कंडेयपुराणे रविलांश्रे प्राधा

निकंरहस्यं॥ ॥ऋषिरुवाच॥ त्रि
गुणा तामसी देवी सात्विकी या त्रि
धोदिता॥ सा शर्वा चंडिका दुर्गा भद्रा
भगवतीर्यत्ते॥१॥ योगनिद्रा हरेरुक्ता
महाकाली तमोगुणा॥ मधुकैटभनाशा
र्थं यां तुष्टावांबुजासनः॥ दशवक्त्रा
दशभुजा दशपादांजनप्रभा॥ विशा

लयाराजमानात्रिंशल्लोचनमालया।
३॥स्फुरद्दशानदंष्ट्राप्सा भीमरूपापिभू
मिपां॥रूपसौभाग्यकांतीनांसाप्रतिष्ठा
महाश्रियां॥४॥खड्गबाणगदाशूलशं
खचक्रभुशुंडिभृत्॥परिघंकार्मुकं॥
शीर्षंनिश्च्योतद्रुधिरंदधौ॥५॥एषासा
वैष्णवीमायामहाकालीदुरत्यया॥

र.हृ.
१४३

आराधितावशीकुर्यात्पूजा कर्त्तुश्च
राचरं॥६॥ सर्वदेवशरीरेभ्योयाविर्भू
तामितप्रभा॥ त्रिगुणासा महालक्ष्मीः
साक्षान्महिषमर्दिनी॥७॥ श्वेताननना
नीलभुजासुश्वेतस्तनमंडला॥ रक्त
मध्यारक्तपादारक्तजंघोरुरुन्मदा

८॥ सुचित्रजघनाचित्रमाल्यांबरा

विभूषणा॥ चित्रानुलेपनाकांतिरू
पसौभाग्यशालिनी॥९॥अष्टादश
भुजापूज्यासासहस्रभुजासती॥
आयुधान्यत्रवक्ष्यंतेदक्षिणाधः
करक्रमात्॥१०॥अक्षमालाचकम
लंबाणोसिःकुलिशंगदा॥चक्रंत्रि
शूलंपरशुःशंखोघंटाचपाशकः॥

र.हृ०
१४४

शक्तिर्दंडश्चर्मचापंपानपात्रंकमंड।
लुः॥अलंकृतभुजामेभिरायुधैःक।
मलासनां॥१२॥सर्वदेवमयीमीशां।
महालक्ष्मीमिमांनृप॥पूजयेत्सर्वदे
वानांसलोकानांप्रभुर्भवेत्॥१३॥गौ
रीदेहात्समुद्भूतायासत्वैकगुणाश्रया
साक्षात्सरस्वतीप्रोक्ताशुंभासुरनि।

राम
१४४

बर्हिणी॥१४॥ दधीचाष्ट भुजाबाण।
मुसले शूलचक्रभृत्॥ शंखं घंटां लां।
गलं च कार्मुकं वसुधाधिप॥१५॥ एषा
संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छति
निशुंभमथनी देवी शुंभासुरनिबर्हि
णी॥१६॥ इत्युक्तानि स्वरूपाणि मूर्ती
नां तव पार्थिव॥ उपासनं जगन्मातुः

र. ह०
१४५

पृथगासांनिशामय॥१७॥महाल
क्ष्मीर्यदापूज्यामहाकालीसरस्वती॥
दक्षिणोत्तरयोः पूज्येपृष्ठतोमिथुनत्र
यं॥१८॥विरिंचिःस्वरयामध्येरुद्रो
गौर्याचदक्षिणे॥वामेलक्ष्म्याहृषीके
शः पुरतोदेवतात्रयं॥१९॥अष्टादशा
भुजामध्येवामेचास्यादशाननाा॥द

राम
१४५

क्षिणेष्टभुजारुक्ष्मीर्महतीत्तिसमर्च्चे।
येत्॥२०॥अष्टादशभुजाचैषायदापू
ज्यानराधिप॥दशाननाचाष्टभुजा
दक्षिणोत्तरयोस्तदा॥२१॥कालम
त्यूचसंपूज्यौसर्वारिष्टप्रशांतये॥य
दाचाष्टभुजापूज्याशुंभासुरनिबर्हि
णी॥२२॥नवास्याःशक्तयःपूज्यास्त

रह०
१४६

थारुद्रविनायको॥ नमोदेव्या इति
स्तोत्रैर्महालक्ष्मीं समर्चयेत्॥२३॥
अवतारत्रयार्चायां स्तोत्रमंत्रास्त
दाश्रयाः॥ अष्टादशभुजा चैषापू
ज्या महिषमर्दिनी॥२४॥ महाल॥
क्ष्मीर्महाकाली सैव प्रोक्ता सरस्वती
ईश्वरी पुण्यपापानां सर्वलोकमहेश्वरी

एम
१४६

श्वरी॥२५॥महिषांतकरीयेनपूजि
तासजगत्प्रभुः॥पूजयेज्जगतांधात्रीं
चंडिकांभक्तवत्सलां॥२६॥अर्घ्यादि
भिरलंकारैर्गंधपुष्पैस्तथोत्तमैः॥धूपै
र्दीपैश्चनैवेद्यैर्नानाभक्ष्यसमन्वितैः॥
२७॥रुधिराक्तेनबलिनामांसेनसुर
यान्नृप॥प्रणामाचमनीयेनचंदनेन(

२६० स्रगंधिना॥२८॥सकर्पूरैश्च तांबूलै
१४७ र्भक्तिभावसमन्वितैः॥वामभागगतो
र्देव्याश्छिन्नशीर्षं महासुरं॥२९॥पूज
येन्महिषं येन प्राप्तं सायुज्यमीशया॥
दक्षिणे पुरतः सिंहं समग्रं धर्ममीश्वरं
३०॥वाहनं पूजयेद्देव्या ध्वतं येन चरा राम
चरं॥ततः कृतांजलिर्भूत्वा स्तुवीत। १४७

चरितैरिमैः॥३१॥एकेनवामध्येमेन
नैकेनेनरयोरिह॥चरितार्धन्तुनजपे
ज्जपन्छिद्रमवाप्नुयात्॥३२॥स्तोत्र
मंत्रैस्तुवीतेमांयदिवाजगदंबिकां॥
प्रदक्षिणानमस्कारान्कृत्वामूर्ध्नि।
कृतांजलिः॥३३॥क्षमापयेज्जगद्धा
त्रीं मुहुर्मुहुरतंद्रितः॥प्रतिश्लोकंच।

जुहुयात्पायसंतिलसर्पिषा॥३४॥
जुहुयात्स्तोत्रमंत्रैर्वाचंडिकायैशु।
भंहविः॥नमोनमःपदैर्देवींपूजये।
त्सुसमाहितः॥३५॥प्रयतःप्रांजलिः
प्रव्हःप्रणम्यारोप्यचात्मनि॥सुचिरं
भावयेद्देवींचंडिकांतन्मयोभवेत्
३६॥एवंयःपूजयेद्भक्त्याप्रत्यहंपर

मेश्वरीं॥ भुक्त्वा भोगानन्यथा कामंदे
वीसायुज्यमाप्नुयात्॥ ३७॥ योन पू
जयते नित्यं चंडिकां भक्तवत्सलां॥
भस्मीकृत्यास्य पुण्यानि निर्दहेत्प
रमेश्वरी॥ ३८॥ तस्मात्पूजय भूपा
ल सर्वलोकमहेश्वरीं॥ यथोक्तेन
विधानेन चंडिकां सुखमाप्स्यसि॥

र० ह० ३२॥ इतिमार्कंडेयपुराणेरविलांशेवे
१४२ कृत्तिकेरहस्यं॥ ऋषिरुवाच॥ नंदा
भगवतीभद्रायाभविष्यतिनंदजा
सास्तुतापूजिताध्यातावशीकुर्या
ज्जगत्त्रयं॥१॥ कनकोत्तमकांतिःसा
सुकांतिकनकांबरा॥ देवीकनकवर्णा राम
माख्याकनकोत्तमभूषणा॥२॥ कम १४२

लांकुशपाशाक्षैरलंकृतचतुर्भुजा
इंदिराकमलालक्ष्मीः साध्वीरुक्मां
बुजासना॥३॥यारक्तदंतिकानाम
देवीप्रोक्तामयानघ॥तस्याःस्वरू
पंवक्ष्यामिशृणुसर्वभयापहं॥४
रक्तांबरारक्तवर्णारक्तसर्वांगभू
षणा॥रक्तायुधारक्तनेत्रारक्तके

रह०
१५०

त्रांतिभीषणा॥५॥रक्ततीक्ष्णनखा
रक्तदशनारक्तदंतिका॥पतिंनारी
वानुरक्तादेवीभक्तंभवेज्जनं॥६॥वसु
धेवविस्तीर्णालासासुमेरुयुगलस्तनी
दीर्घौलंबावतिस्थूलौतावतीवमनो
हरौ॥७॥कर्कशावतिकांतौतौसर्वा
नंदपयोनिधी॥भक्तान्संपाययेद्दे

राम
१५०

वीसर्वकामदुघोस्तनौ॥८॥खड्गंपा
त्रंचमुसलंलांगलंचबिभर्तिसा॥आ
ख्यातारक्तचामुंडादेवीयोगेश्वरी(
तिच॥९॥अनयाव्याप्तमखिलंज
गत्स्थावरजंगमं॥इमांयःपूजयेद्भ
क्त्यासव्याप्नोतिचराचरं॥१०॥अ(
धीतेयइमंनित्यंरक्तदंत्यावपुस्त

र० हृ०
१५१

वं॥ तंसापरिचरेद्देवी पत्तिंप्रियमिवांगना॥११॥ आकंभरीनीलवर्णा नीलोत्पलविभूषणा॥ गंभीरनाभिस्त्रिवलीविभूषिततनूदरी॥१२॥ सुकर्कशासमोत्तुंगवृत्तपीनघनस्तनी॥ मुष्टिंशिलीमुखैः पूर्णंकमलंकमलालया॥१३॥ पुष्पपल्लव

राम
१५१

मूलादि फलाद्यं शाकसंचयं ॥ का
म्यानंतरसैर्युक्तं क्षुत्तृष्णमृत्युज्वरा
पहं ॥ १४ ॥ कार्मुकं च स्फुरत्कांतिवि
भ्रती परमेश्वरी ॥ शाकंभरी शता
क्षी सा सैव दुर्गा प्रकीर्त्तिता ॥ १५ ॥
उमा गौरी सती चंडी कालिका सा
च पार्वती ॥ शाकंभरीं स्तुवं ध्याय

रहे०
१५२

नूजयंसंपूजयन्नमन्॥१६॥अक्षा
य्यमश्नुतेत्तीश्रमन्नपानादिसर्वं
त्रः॥भीमापिनीलवर्णासादंष्ट्राद
शनभास्करा॥१७॥विशालक्षोच
नानारीवृत्तपीनघनस्तनी॥चंद्र
हासंचडमरुंशिरःपात्रंचबिभ्रती राम
१८॥एककवीराकालरात्रिःसैवोक्ता १५२

कामदास्तुता॥ तेजोमंडलदुर्धर्षा॥
भ्रामरीचित्रकांतिभृत्॥१९॥ चित्र
भ्रमणपाणिः सा महामारीत्तिगीय
ते॥ इत्येता मूर्तयो देव्या व्याख्याताव
सुधाधिप॥२०॥ जगन्मातुश्चंडिका
याः कीर्तिताः कामधेनवः॥ इदं रहस्यं
परमं न वाच्यं यस्य कस्यचित्॥२१॥

र० ह० व्याख्यानं दिव्यमूर्त्तीनामधीष्वाव
१५३ हितः स्वयं ॥ दिव्याध्यानं तवाख्यातं
गुह्याद्गुह्यतरं महत् ॥ २४ ॥ तस्मात्स
र्वप्रयत्नेन सर्वकामफलप्रदं ॥ २३ ॥
इति मार्कंडेयपुराणे खिलांत्रे मूर्त्तिर
हस्यं ॥ श्रीजगदंबार्पणमस्तु ॥ ततः पू राम
र्ववत् नवार्णमंत्रेण करन्यासं षडंग १५३

न्यासं च कृत्वा ऽष्टोत्तर १०८ शतसं
ख्याकं नवार्णमंत्रं जपित्वा करषडं
गन्यासौ कृत्वा ॥ गुह्याति० त्वयि स्थि
ता इति मंत्रेण श्री महालक्ष्मी वाम
करे जलोत्सर्गेण पाठजपनिवेदनं
कुर्यात् ॥ ततः श्री महालक्ष्मीं ध्या
त्वा ॥ नमस्कृत्य निजाभीष्ट सिद्धिं प्रा

र ह० थयेत्तु॥यस्य स्मृत्या० प्रमादा० वि

१५४ क्षमेव० ३ श्री चंडिकायै० ३ अनेनक्र

तेन सांगोपांगसप्तशतीस्तोत्रपाठक

र्मणा॥श्री॥महाकाली० रूप श्रीमहाल

क्ष्मीः प्रीयत्तां॥ॐतत्सत्॥० ॥यदक्षरं

०१ विसर्गबिंदु० २ हिरा चामेत्तु॥इति राम

सप्तशतीपाठनित्यक्रमः॥ ॥ १५४

रह० मितिमार्गशीर्षशुक्ल २ संवत् १९२३
१५५ मुक्कामसागरहस्ताक्षरबळवंतराव
रामचंद्रआंबेकर॥ ॥ ॥

राम
१५५

॥ इति ससवानीस्तोत्रं संपूर्णं ॥

[OrderDescription]
,CREATED=04.08.20 16:03
,TRANSFERRED=2020/08/04 at 16:30:37
,PAGES=325
,TYPE=STD
,NAME=S0003418
,Book Name=M-2463-SAPTSHATI STROT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF

FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF

FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF

FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF

FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF

FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF

FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF

FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF

FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF

FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF

FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF

FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF

FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF

FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF

FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF

FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF

FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF

FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF

FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,